# Svatmapuja Ratnapanchakam 5

# સ્વાત્મપૂજા રત્નપઞ્ચકમ્ ૫

## Document Information

Text title : Svatmapuja (Ratnapanchakam 5)

File name : svAtmapUjA.itx

Category : misc, pUjA

Location : doc_z_misc_general

Author : Kalyanasevaka

Proofread by : Brahatha Mohan

Latest update : May 22, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 23, 2026

*sanskritdocuments.org*

# સ્વાત્મપૂજા રત્નપઞ્ચકમ્ ૫

(રત્નપઞ્ચકે પઞ્ચમં રત્નમ્ ।)

સર્વે જાનન્તિ પૂજાં વિવિધવિધિકલાં ધ્યાનમાવાહનાદીન્
પાદ્યાર્ઘ્યસ્નાનગન્ધાદિકમપિ ચ તતો ધૂપદીપાદિકં ચ ।
સ્તુત્વા ત્યક્ત્વૈવ દેવં સકલનિગમજં, ધાતુપાષાણમૂર્તિં
સંસારે સઞ્ચરન્તિ ભ્રમનિરતજના નૈવ જાનન્તિ હૃત્સ્થમ્ ॥ ૧॥

બ્રહ્મેશાનપુરન્દરપ્રભૃતિભિર્દેવૈર્જનૈર્વન્દિતં
સ્વસ્મિન્સ્વેન સદાઽનુભૂતમચલં તદ્વાઙ્મનોઽગોચરમ્ ।
ધ્યાતૃધ્યેયવિવર્જિતં શુભતમં ધ્યાનં સ્વમાત્રં પરં
પૂર્ણાનન્દમખણ્ડમચ્યુતમહં બ્રહ્મૈવ સચ્ચિદ્ઘનમ્ ॥ ૨॥

પૂર્ણાત્પૂર્ણતરં પરાત્પરતરં પ્રત્યક્સ્વરૂપં સ્વયં
બ્રહ્મૈવાસ્મિ સદેકચિદ્ઘનસુખં શાન્તં હ્યજં કેવલમ્ ।
વ્યાપ્તં સ્વેન ચરાચરં ત્રિભુવનં કિં સ્વસ્ય ચાવાહનં
કર્તું કોઽપિ કદા કથઞ્ચિદપિ નો કુત્રાપિ શક્નોતિ વૈ ॥ ૩॥

નાના નાસ્તિ પદાર્થમાનમપિ તત્સચ્ચિત્સુખં કેવલં
માયાકારણકાર્યશૂન્યમમલં કાલત્રયાબાધિતમ્ ।
દેહાતીતમચઞ્ચલં પદમહં દિગ્દેશભેદો ન મે
તસ્માદત્ર ન મહ્યમાસનવિધિર્બ્રહ્મૈવ પૂર્ણં જગત્ ॥ ૪॥

પાદો નાસ્તિ શરીરશૂન્યમચલં કલ્યાણવસ્તુ સ્વયં
ચાપઃ સન્તિ ન ભૂતરૂપમખિલં કિઞ્ચિન્મયિ બ્રહ્મણિ ।
પાદ્યં કુત્ર સમર્પ્યતાં ન હિ જલં સઙ્કલ્પકો નાસ્તિ વૈ
નિત્યાપ્તં પરમં પદં નિરુપમં પૂર્ણં પરં ધામ મે ॥ ૫॥

અન્તર્બાહ્યવિશેષભેદરહિતં સ્વસ્મિન્સ્વમાત્રં ન્વહં
હસ્તો નૈવ ચ દેહભાવરહિતત્ત્વાદ્બ્રહ્મ યસ્માત્સ્વયમ્ ।

અર્ઘ્યં કેન કથં ચ વારિરહિતં સઙ્કલ્પનીયં મનોઽ-
ભાવાદ્બ્રહ્મ સદદ્વિતીયપરમાનન્દૈકસંરાડહમ્ ॥ ૬॥

ગઙ્ગા નૈવ સરસ્વતી ચ યમુના કૃષ્ણા ન ગોદાવરી
કાવેરી ચ ઘટપ્રભા ન સરયૂ તુઙ્ગા તથા નર્મદા ।
સિન્ધુર્નૈવ સમુદ્ર એવ ન મથિ બ્રહ્માર્ણવે કેવલે
પૂર્ણાનન્દમયે સ્વરૂપવિમલે સ્નાનસ્ય કોઽયં વિધિઃ ! ॥ ૭॥

બ્રહ્મૈકાવરણસ્ય નામ્બરમહો ! નામામ્બરસ્યાપિ મે
સૂત્રં, કેવલમેવ વસ્તુ તતમાકાશે પદાર્થાદિકે ।
ગન્ધો માયિકભેદગન્ધરહિતં તદ્વાસનાવર્જિતમ્
સચ્ચિન્માત્રમનન્તમવ્યયપદં બ્રહ્મૈવ ભૂમા સ્વયમ્ ॥ ૮॥

બ્રહ્માત્મૈક્યરવિપ્રકાશકિરણૈર્હૃત્પદ્મમુલ્હાસિતં
સ્વાત્માનન્દસુગન્ધલક્ષ્મ્યનુભવાદ્દ્વૈતગન્ધોગતઃ ।
નિત્યં શુદ્ધમજં હ્યુપાધિરહિતં નિર્વાણમેકં સ્વયં
મય્યાત્મન્યચલે ચ કેવલમજે પુષ્પસ્ય કા કલ્પના ! ॥ ૯॥

કાશ્મીરોદ્ભવગન્ધવસ્તુબહુલં શ્રીચન્દનં ચાગરું
મિશ્રીકૃત્ય સુગન્ધિધૂપમમલં કાર્પાસદીપં વૃથા ।
માયામોહમનોમલાદિરહિતે ચાદ્વૈતસૂર્યોદયે
ધૂપં દીપમસઙ્ગવસ્તુનિ શુભાત્મન્યેવ તસ્માત્કથં ! ॥ ૧૦॥

ભક્ષ્યં ભોજ્યમનેકમિશ્રિતપયો લેહ્યં ચ દેવાય મે
નૈવેદ્યં સુનિવેદયન્તિ નયને ધૃત્વાઽથવાનાસિકામ્ ।
ત્રૈલોક્યં સકલં મયા સુગિલિતં બ્રહ્માત્મના સંસ્થિતઃ
સચ્ચિધ્યૈકરસોઽમૃતોઽહમમલો નૈવેદ્યમસ્માન્નુ કિમ્ ॥ ૧૧॥

તામ્બૂલસ્ય તુ ચર્વણં સકલધીર્બ્રહ્માહમસ્મીતિ વૈ
પૂર્ણા ભૂરપિ કાઞ્ચનેન કિમુ સા બ્રહ્માત્મને દક્ષિણા ! ।
નિર્વાણં પરિપૂર્ણમેકમચલં કિં તત્ફલં દીયતે
હ્યાનન્દામૃતવારિધૌ કિમપિ નો "બ્રહ્માસ્મિ" વૃત્તિર્ન હિ ॥ ૧૨॥

નૈશ્ચલ્યે નિરુપાધિકે નિરુપમે નિર્નામ્નિ નિત્યે નિજે
સ્વાનન્દે કિમપિ પ્રદક્ષિણવિધિર્નૈવાસ્તિ સત્યાત્મનિ ।
મૌનં સ્તોત્રમખણ્ડપૂર્ણસહજાવસ્થૈવ ભક્તિઃ શુભા
કલ્યાણી મનસો હતિર્નનુ નતિર્મે સ્વાત્મપૂજાકૃતે ॥ ૧૩॥

કિં ગ્રાહ્યં ચ વિસર્જનં કિમપિ ન હ્યદ્વૈતમાત્રે પરે
પ્રજ્ઞાને પરમે પુરાતનપદે સાક્ષાન્મયિ સ્વાત્મનિ ।
પ્રત્યક્પૂર્ણરસેઽપરોક્ષવિમલે વિજ્ઞાનવિશ્વાધિકે
શાન્તાનન્દસદોજ્વલામૃતઘને કલ્યાણસત્સેવકે ॥ ૧૪॥

ઇત્થં યઃ સ્વાત્મપૂજાં નિરવધિવિમલાં સૌખ્યદાત્રીં કરોતિ
દ્વૈતાદ્ભીતિર્ન કિઞ્ચિજ્જનનમરણજા શોકમોહૌ ન તસ્ય ।
કાલસ્થાનાદ્યપેક્ષા કિમપિ ન શુચિતા સ્વાત્મશુદ્ધિસ્તુ મુખ્યા
કલ્યાણાર્થં સ્વપૂજા વિમલનરવરૈરેવ કાર્યા હૃદબ્જે ॥ ૧૫॥

ઇતિ શ્રીસમર્થરામદાસ-કલ્યાણપદાન્વિત-
કલ્યાણસેવકપ્રણીત રત્નપઞ્ચકે સ્વાત્મપૂજાનામ પઞ્ચમં રત્નં સમ્પૂર્ણમ્ ।
ઇતિ રત્નપઞ્ચકમ્ ।
॥ ૐ તત્સત્ ॥

Proofread by Brahatha Mohan

*Svatmapuja Ratnapanchakam 5*
pdf was typeset on May 23, 2026

Please send corrections to *sanskrit@cheerful.com*